শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৬৯

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৬৯

*রাসক্রীডাৱর্ণনম্*

কেশপাশধৃতপিঞ্ছিকাৱিততিসঞ্চলন্মকরকুণ্ডলং
হারজালৱনমালিকাললিতমঙগরাগঘনসৌরভম্।
পীতচেলধৃতকাঞ্চিকাঞ্চিতমুদঞ্চদংশুমণিনূপুরং
রাসকেলিপরিভূষিতং তৱ হি রূপমীশ কলযামহে॥ ১ ॥

তাৱদেৱ কৃতমণ্ডনে কলিতকঞ্চুলীককুচমণ্ডলে
গণ্ডলোলমণিকুণ্ডলে যুৱতি মণ্ডলেথ পরিমণ্ডলে।
অন্তরা সকলসুন্দরীযুগলমিন্দিরারমণ সঞ্চরন্
মঞ্জুলাং তদনু রাসকেলিমযি কঞ্জনাভ সমুপাদধাঃ॥ ২ ॥

ৱাসুদেৱ তৱ ভাসমানমিহ রাসকেলিরসসৌরভং
দূরতোপি খলু নারদাগদিতমাকলয্য কুতুকাকুলা।
ৱেষভূষণৱিলাসপেশলৱিলাসিনীশতসমাৱৃতা
নাকতো যুগপদাগতা ৱিযতি ৱেগতোথ সুরমণ্ডলী॥ ৩ ॥

ৱেণুনাদকৃততানদানকলগানরাগগতিযোজনা-
লোভনীযমৃদুপাদপাতকৃততালমেলনমনোহরম্।
পাণিসংক্বণিতকঙকণং চ মুহুরংসলম্বিতকরাম্বুজং
শ্রোণিবিম্বচলদম্বরং ভজত রাসকেলিরসডম্বরম্॥ ৪ ॥

শ্রদ্ধযা ৱিরচিতানুগানকৃততারতারমধুরস্বরে
নর্তনেথ ললিতাঙগহারলুলিতাঙগহারমণিভূষণে।
সম্মদেন কৃতপুষ্পৱর্ষমলমুন্মিষদ্দিৱিষদাং কুলং
চিন্ময়ে ত্বযি নিলীযমানমিৱ সম্মুমোহ সৱধূকুলম্॥ ৫ ॥

স্বিন্নসন্নতনুৱল্লরী তদনু কাপি নাম পশুপাঙগনা
কান্তমংসমৱলম্বতে স্ম তৱ তান্তিভারমুকুলেক্ষণা।
কাচিদাচলিতকুন্তলা নৱপটীরসারঘনসৌরভং
ৱঞ্চনেন তৱ সঞ্চুচুম্ব ভুজমঞ্চিতোরুপুলকাঙকুরা॥ ৬ ॥

কাপি গণ্ডভুৱি সন্নিধায নিজগণ্ডমাকুলিতকুণ্ডলং
পুণ্যপূরনিধিরন্বৱাপ তৱ পূগচর্ৱিতরসামৃতম্।
ইন্দিরাৱিহৃতিমন্দিরং ভুৱনসুন্দরং হি নটনান্তরে
ত্বামৱাপ্য দধুরঙগনাঃ কিমু ন সম্মদোন্মদদশান্তরম্॥ ৭ ॥

গানমীশ ৱিরতং ক্রমেণ কিল ৱাদ্যমেলনমুপারতং
ব্রহ্মসম্মদরসাকুলাঃ সদসি কেৱলং ননৃতুরঙগনাঃ।
নাৱিদন্নপি চ নীৱিকাং কিমপি কুন্তলীমপি চ কঞ্চুলীং
জ্যোতিষামপি কদম্বকং দিৱি ৱিলম্বিতং কিমপরং ব্রুৱে॥ ৮ ॥

মোদসীম্নি ভুৱনং ৱিলাপ্য ৱিহৃতিং সমাপ্য চ ততো ৱিভো
কেলিসম্মৃদিতনির্মলাঙগনৱঘর্মলেশসুভগাত্মনাম্।
মন্মথাসহনচেতসাং পশুপযোষিতাং সুকৃতচোদিত-
স্তাৱদাকলিতমূর্তিরাদধিথ মারৱীরপরমোতসৱান্॥ ৯ ॥

কেলিভেদপরিলোলিতাভিরতিলালিতাভিরবলালিভিঃ
স্বৈরমীশ ননু সূরজাপযসি চারুনাম ৱিহৃতিং ৱ্যধাঃ।
কাননেপি চ ৱিসারিশীতলকিশোরমারুতমনোহরে
সূনসৌরভমযে ৱিলেসিথ ৱিলাসিনীশতৱিমোহনম্॥ ১০ ॥

কামিনীরিতি হি যামিনীষু খলু কামনীযকনিধে ভৱান্
পূর্ণসম্মদরসার্ণৱং কমপি যোগিগম্যমনুভাৱযন্।
ব্রহ্মশঙকরমুখানপীহ পশুপাঙগনাসু বহুমানযন্
ভক্তলোকগমনীযরূপ কমনীয কৃষ্ণ পরিপাহি মাম্॥ ১১ ॥

**********